नोच्छिष्टादौ निषेधोऽस्ति हरेर्नामनि लुब्धक ॥
स्नानं देशार्च्चनं ध्यानं धारणा नियमो यमः ।
प्रत्याहारः समाधिश्च हरिनामसमं न च ॥”
इति पाद्मोत्तरखण्डे ९८ अध्यायः ॥
अपि च ।
“हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥”
इति श्रीहरिभक्तिविलासस्य ११ विलासे बृहन्नारदीयपुराणवचनम् ॥ * ॥ वैष्णवानां जप्यहरिनामानि यथा,—
“हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।
हरे राम हरे राम राम राम हरे हरे ॥”
अस्य प्रमाणादि यथा,—
त्रिपुरोवाच ।
“वासुदेव महाबाहो ! शृणुष्व परमं वचः ।
त्वं हि देव सुरश्रेष्ठः किमर्थं तप्यते तपः ॥
कुलाचारं विना पुत्त्र ! नहि सिद्धिः प्रजायते ।
शक्तिहीनस्य ते सिद्धिः कथं भवति रे सुत ! ॥
ममांशसम्भवां लक्ष्मीं त्यक्त्वा किं तप्यते तपः ।
वृथा श्रमं वृथा पूजां जपञ्च विफलं सुत ! ॥
संयोगं कुरु यत्नेन शक्त्या सह तपोधन ! ।
सुखं विना सुतश्रेष्ठ ! विद्यासिद्धिर्न्न जायते ॥
साधके क्षोभमापन्ने देवता क्षोभमाप्नुयात् ।
तस्माद्भोगयुतो भूत्वा जपकर्म्म समारभेत् ॥
भोगं विना सुतश्रेष्ठ ! नहि मोक्षः प्रजायते ।
शृणु पुत्त्र सुतश्रेष्ठ दीक्षाया आनुपूर्व्विकीम् ॥
दशवर्षे तु संप्राप्ते द्वादशाभ्यन्तरे सुत ! ।
शृणुयाद्धरिनामानि षोडशानि पृथक् पृथक् ।
हरिनाम विना पुत्त्र ! कर्णशुद्धिर्न्न जायते ॥
श्रीवासुदेव उवाच ।
शृणु मातर्म्महामाये विश्वबीजस्वरूपिणि ! ।
हरिनाम महामाये क्रमात्तव मतं वद ॥ * ॥
त्रिपुरोवाच ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।
हरे राम हरे राम राम राम हरे हरे ॥
द्वात्रिंशदक्षराण्येवं कलानामश्रुतं सदा ।
शृणु छन्दः सुतश्रेष्ठ ! हरिनाम्नस्तु चैव हि ॥
छन्दो हि परमं गुह्यं महत् पदमनव्ययम् ।
सर्व्वंशक्तिमयं तत्त्वं हरिनाम तपोधन ! ॥”* ॥
अस्य श्रीहरिनाममन्त्रस्य वासुदेव ऋषिर्गायत्री छन्दः श्रीत्रिपुरा देवता मम महाविद्यासिद्ध्यर्थे विनियोगः ॥ * ॥
“एतन्मन्त्रं सुतश्रेष्ठ ! प्रथमं शृणुयान्नरः ।
श्रुत्वा द्विजमुखात् पुत्त्र दक्षकर्णे तपोधन ! ॥
आदौ छन्दस्ततो मन्त्रं श्रुत्वा शुद्धो भवेन्नरः ।
द्वादशाभ्यन्तरे श्रुत्वा कर्णशुद्धिमवाप्नुयात् ॥
कर्णशुद्धिं विना पुत्त्र महाविद्यामुपालभेत् ।
नारी वा पुरुषो वापि तत्क्षणात्ताक्षरको भवेत् ॥
ततस्तु षोडशे वर्षे संप्राप्ते सुरवन्दित ! ।
महाविद्यां ततः शुद्धां नित्यां ब्रह्मस्वरूपिणीम् ।
श्रुत्वा कुलमुखाद्विप्रात् साक्षात् ब्रह्ममयो भवेत् ।
कुर्य्यादेतद्रहस्यं यः शिवोक्तञ्च तपोधन ! ।
तस्य सिद्धिर्भवेद्दिव्या अष्टैश्वर्य्यमवाप्नुयात् ॥
रहस्यं हि विना पुत्त्र ! श्रम एव हि केवलम् ।
अतएव सुतश्रेष्ठ ! रहस्यरहितस्तव ।
रहस्यरहितां विद्यां न जपेत्तु कदाचन ॥ * ॥
हकारस्तु सुतश्रेष्ठ ! शिवः साक्षान्न संशयः ।
रेफस्तु त्रिपुरादेवी मम मूर्त्तिमयी सदा ॥
एकारश्च भगं विद्यात् साक्षाद्‌योनिं तपोधन ! ।
एकारः शून्यरूपी च रेफो विग्रहधारिणः ।
हरे तु त्रिपुरा साक्षान्मम मूर्त्तिर्न्न संशयः ॥
ककारः कामदा कामरूपिणी स्फुरदव्ययम् ।
ऋकारश्च सुतश्रेष्ठ ! ज्येष्ठा शक्तिरितीरिता ॥
ककारश्च ऋकारश्च कामिनी वैष्णवी कला ॥
षकारश्चन्द्रमा देवः कलाषोडशसंयुतः ॥
णकारश्च सुतवर ! साक्षान्निर्वृतिरूपिणी ।
द्वयोरैक्यं तपःश्रेष्ठ ! महामाया जगन्मयी ॥
कृष्ण कृष्ण सुतश्रेष्ठ ! महामाया जगन्मयी ।
हरे हरे ततो देवि ! शिवशक्तिस्वरूपिणी ॥
हरे रामेति च पदं शिवशक्तिमयं सुत ! ।
हरे हरे इति पदं शक्तिद्वयसमन्वितम् ॥
आद्यन्ते प्रणवं दत्त्वा यो जपेद्दशधा द्विजः ।
स भवेत् सुतवर ! श्रेष्ठो महाविद्यासु सुन्दरः ॥
हरिनाम सुतश्रेष्ठ ! ज्येष्ठं तु वैष्णवं मतम् ॥
एवं षोडश नामानि द्वात्रिंशदक्षराणि च ।
आद्यन्ते प्रणवं दत्त्वा चतुस्त्रिंशदनुत्तम ! ॥
हरिनाम विना पुत्त्र ! दीक्षा च विफला सदा ।
कुलदेवमुखाच्छ्रुत्वा हरिनाम पराक्षरम् ॥
ब्राह्मणक्षत्त्रवैश्याश्च शूद्रः श्रुत्वा पराक्षरम् ।
दीक्षां कुर्य्यात् सुतश्रेष्ठ ! महाविद्यासु सुन्दर ! ॥
दीक्षां वापि हरेर्न्नाम यदि शूद्रमुखात् प्रिये ! ।
अज्ञानाद्‌यदि गृह्णीयात् तस्य पापफलं शृणु ॥
शूद्रः शूद्रमुखात् श्रुत्वा विद्यां वा मन्त्रमुत्तमम् ।
कोटिवंशान् समादाय रौरवं प्रति गच्छति ।
अपि दाक्षग्रहीत्रोर्वा द्वयोरपि समं फलम् ॥
ब्रह्महत्यामवाप्नोति अक्षरं अक्षरं प्रति ।
शृणु पुत्त्र ! वासुदेवप्रसङ्गाद्वचनं मम ॥”
इति श्रीवासुदेवमाहात्म्ये राधातन्त्रे त्रिपुरावासुदेवसंवादे द्वितीयपटलः ॥

हरिनामा, [न्] पुं, (हरेर्नाम नाम यस्य ।) मुद्गः । इति त्रिकाण्डशेषः ॥

हरिनेत्रं, क्ली, (हरेर्नेत्रमिव ।) श्वेतपद्मम् । इति राजनिर्घण्टः ॥ श्रीहरेर्लोचनम् । यथा,—
“विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ।
विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥”
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥
हरिद्वर्णचक्षुश्च ॥

हरिनेत्रः, पुं, (हरेर्मर्कटस्येव नेत्रमस्य) पेचकः । इति त्रिकाण्डशेषः ॥

हरिन्मणिः, पुं, (हरिद्वर्णो मणिः ।) मरकतमणिः । इत्यमरः । २।८।९२ ॥ (यथा, माघे । ४ । ४८ ।
“हरिन्मणिश्यामतृणाभिरामै-
र्गृहाणि नीध्रैरिव यत्र रेजुः ॥”)

हरिन्मुद्गः, पुं, (हरिद्वर्णो मुद्गः ।) शारदमुद्गः । इति राजनिर्घण्टः ॥

हरिपर्णं, क्ली, (हरि हरिद्वर्णं पर्णं यस्य ।) मूलकम् । इति हेमचन्द्रः ॥

हरिप्रियं, क्ली, (हरेः प्रियम् ।) कृष्णचन्दनम् । इति शब्दचन्द्रिका ॥ तत्तु कालीयकम् कालियाकाष्ठमिति ख्यातम् । इति रत्नमाला ॥ (यथा,
“कालीयकन्तु कालीयं पीताभं हरिचन्दनम् ।
हरिप्रियं कालसारं तथाकालानुसार्य्यकम् ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
उशीरम् । इति राजनिर्घण्टः ॥

हरिप्रियः, पुं, (हरेः प्रियः ।) कदम्बवृक्षः । इति शब्दचन्द्रिकामरौ । २ । ४ । ४२ ॥ पीतभृङ्गराजः । विष्णुकन्दः । करवीरः । शङ्खः । बन्धूकः । इति राजनिर्घण्टः ॥ शिवः । वातुलः । कञ्चुकः । इति केचित् ॥

हरिप्रिया, स्त्री, (हरेः प्रिया ।) लक्ष्मीः । इत्यमरः । १ । १ । २८ ॥ तुलसी । द्वादशीतिथिः । पृथिवी । इति केचित् ॥

हरिवालुकं, क्ली, (हरिप्रिया वालुका यत्र) एलवालुकम् । इत्यमरः । २ । ४ । १२१ ॥

हरिभक्तः, पुं, (हरेर्भक्तः ।) हरिसेवकः । तस्य लक्षणं यथा,—
“सर्व्वजीवेषु यो विष्णुं भावयेत् समताधिया ।
हरौ करोति भक्तिञ्च हरिभक्तः स च स्मृतः ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥

हरिभद्रं, क्ली, (हरेर्भद्रं हर्षियंस्मात् ।) हरिवालुकम् । इति शब्दचन्द्रिका ॥

हरिभाविणी, स्त्री, हरिं भावयितुं शीलं यस्याः सा । (हरि+भू+णिनि । ङीप् ।) हरिभावनाशीला । इति मुग्धबोधव्याकरणम् ॥

हरिभुक्, [ज] पुं, (हरिं भेकं भुङ्क्ते इति । भुज+क्विप् ।) सर्पः । इति शब्दरत्नावली ॥

हरिमन्थः, पुं, गणिकारिका । इति शब्दरत्नावली ॥ चणकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
“चणको हरिमन्थः स्यात् सकलप्रिय इत्यपि ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
देशविशेषः । इति हरिमन्थजशब्दटीकायां भरतः ॥

हरिमन्थकः, पुं, (हरिमन्थ एव । स्वार्थे कन् ।) चणकः । इत्यमरः । २ । ९ । १८ ॥

हरिमन्थजः, पुं, चणकः । इत्यमरः । २ । ९ । १८ ॥ हरिमन्थे देशे प्राचुर्य्येण जातवान् हरिमन्थजः । जनजनादिति डः । इति भरतः ॥ (क्लीवेऽपि दृश्यते । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
“स्वादुपाकरसं शाकं दुर्ज्जरं हरिमन्थजम् ॥”)
कृष्णमुद्गः । इति हेमचन्द्रः ॥

हरियः, पुं, (हरिं पीतवर्णं याति प्राप्नोतीति । या+कः ।) पीतवर्णघोटकः । इति हेमचन्द्रः ॥

हरिले, व्य, नाट्योक्तौ चेटीसम्बोधनम् । इति केचित् ॥